परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥"
इति भट्टिः । २ । ५ ॥

परस्मैपदं, क्ली, (परस्मै परार्थं परबोधकं पदम् ।) दशलकाराणां प्रत्येकं पूर्व्वनवविभक्तयः । यथा, "लड़ादिषु पूर्व्वं नव परस्मैपदं परे नव आत्मनेपदं परिभाष्यन्ते । इति संक्षिप्तसारव्याकरणम् ॥ (तास्व पाणिनिमते । तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥) वोपदेवेनास्य पसंज्ञा कृता । यथा । "नवशः पमे शितोऽन्यङिङ्गां घे ।" इति मुग्धबोधव्याकरणम् ॥

परस्वधः, पुं, (परश्वध+निपातनात् सत्वम् ।) परश्वधः । कुठारः । इत्यमरटीकायां रायमुकुटः ॥

परा, व्य, विमोचः । प्राधान्यम् । प्रातिलोम्यम् । धर्षणम् । आभिमुख्यम् । भृशार्थम् । विक्रमः । गतिः । वधः । इति मेदिनी ॥ * ॥ उपसर्गविशेषः । अस्यार्थः । भङ्गः । अनादरः । प्रत्यावृत्तिः । न्यग्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परा, स्त्री, (पॄ+अच्+ततः टाप् ।) बन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ (अस्याः गुणा यथा,—
"बन्ध्याकर्कोटकी लघ्वी कफशुद्व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नाभिरूपमूलाधारात् प्रथमोदितनादस्वरूपवर्णः । यथा,—
"मूलाधारात् प्रथमसुदितो यस्तु भावः पराख्यः ॥"
इत्यलङ्कारकौस्तुभे प्रथमकिरणः ॥
(पूरयति सागरं भक्तमनोरथञ्चेति व्युत्पत्त्या गङ्गा । यथा, काशीखण्डे । २९ । १०६ ।
"परानन्दा प्रकृष्टार्या प्रतिष्ठा पालनी परा ॥"
गायत्री । यथा, देवीभागवते । १२ । ६ । ९० ।
"पार्व्वती परमोदारा परब्रह्मात्मिका परा ॥")

पराकः, पुं, (परं अत्यन्तं अकं दुःखं उपवासादिजन्यशारीरिकादिक्लेशो यत्र यस्माद्वा ।) व्रतविशेषः । खड्गः । इति मेदिनी ॥ क्षुद्रः । रोगविशेषः । जन्तुविशेषः । इति विश्वः ॥ * ॥ पराकव्रतमाह मनुः । ११ । २१५ ।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥"
पराके पञ्च धेनवः पराकस्य प्राजापत्यपञ्चकतुल्यत्वात् । यथा अङ्गिराः ।
"षड्भिर्व्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति ।
मासि मासि पराकेण त्रिभिर्व्वर्षैर्यपोहति ॥"
अत्र षड्भिर्व्वर्षैः साशीतिशतप्राजापत्यानि पूर्व्वमुक्तानि तथा प्रतिमास्येकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत् पराकाः । ततश्च षट्त्रिंशत् पराकाशीत्युत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वं षट्त्रिंशतश्च पञ्चगुणमशीत्युत्तरशतं भवतीति । अतः प्राजापत्यपञ्चकतुल्यः पराकः । इति प्रायश्चित्ततत्त्वम् ॥ * ॥
"द्वादशाहोपवासेन पराकः सर्व्वपापहा ॥"
इति गरुड़पुराणे प्रायश्चित्तप्रकरणम् ॥

पराक्, [च्] त्रि, परा अञ्चतीति । (परा+अञ्च+क्विप् ।) प्रतिलोमगमनाश्रयः ॥

पराक्पुष्पी, स्त्री, (पराक् पुष्पं यस्याः ।) अपामार्गः । इति राजनिर्घण्टः ॥ (अपामार्गशब्देऽस्या विवृतिरुक्ता ॥)

पराक्रमः, पुं, पराक्रम्यतेऽनेन । (क्रम+"हलश्च ।" ३ । ३ । १२१ । इति घञ् । "नोदात्तोपदेशस्य ।" ७ । ३ । ३४ । इति न वृद्धिः ।) तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ शक्तिः ९ प्राणः १० । इत्यमरः । २ । ८ । १०२ ॥ महः ११ शुष्म १२ सामर्थ्यम् १३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये देवीमाहात्म्ये । ९२ । १३ ।
"पराक्रमञ्च युद्धेषु जायते निर्भयः पुमान् ॥")
विक्रमः ॥ (यथा, मार्कण्डेये । २० । २५ ।
"यस्य मित्रगुणान् मित्राण्यमित्राश्च पराक्रमम् ।
कथयन्ति सदा सत्सु पुत्रवांस्तेन वै पिता ॥")
उद्योगः । इति मेदिनी ॥ निष्क्रान्तिः । इति शब्दरत्नावली ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ४४ ।
"औषधं जगतः सेतुः सत्यधर्म्मः पराक्रमः ॥")

परागः, पुं, (परागच्छतीति । गम+"अन्येभ्योऽपीति ड़ः ।) पुष्पधूलिः । तत्पर्य्यायः । सुमनोरजः २ कौसुमरेणुः ३ । इत्यमरः । २ ।४।१७॥ पुष्परेणुः ४ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशती । ५०६ ॥ [गेण ।
"लिप्तं न मुखं नाङ्गं न पक्षती न चरणाः पराअस्पृशतेव नलिन्या विदग्धमधुपेन मधु पीतम् ॥")
धूलिः ॥ (यथा, रघुः । ४ । ३० ।
"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुस्कन्धेव सा चमूः ॥")
स्नानीयद्रव्यम् ॥ गिरिप्रभेदः ॥ विख्यातिः ॥ उपरागः ॥ चन्दनम् । इति मेदिनी ॥ स्वच्छन्दगमनम् । इति शब्दरत्नावली ॥

पराङ्गदः, पुं, (परं अङ्गं काशीन्दत्यौ शिवत्वं ददातीति । दा+कः ।) शिवः । इति शब्दमाला ॥

पराङ्गवः, पुं, (पराङ्गं जलवृक्षा प्रचुरशरीरं वाति प्राप्नोतीति । वा+कः ।) समुद्रः । इति त्रिकाण्डशेषः ॥

पराङ्मुखः, त्रि, (पराक् प्रतिलोमगामि मुखं यस्य ।) विमुखः । तत्पर्य्यायः । पराचीनः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, मनुः । १० । ११९ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ॥
तन्त्रोक्तमन्त्रविशेषे, पुं । यथा, तन्त्रसारे ।
"कामबीजं मुखे माया शिरस्यङ्कुशमेव च ।
असौ पराङ्मुखः प्रोक्तो मध्ये तु बिन्दुलाञ्छितः ॥")

पराचितः, त्रि, (परेण आचितः पालितः ।) परपुष्टः । परद्वारा प्रतिपालितः । तत्पर्य्यायः । परिस्कन्दः २ परजातः ३ परैधितः ४ । इत्यमरः ।२।१०।१८॥ परिष्कन्दः ५ । इति भरतः ॥

पराचीनः, त्रि, (पराञ्चति अनभिमुखीभवतीति । अञ्चु+"ऋत्विग्दधृक् ।" ३ । २ । ५९ । इति क्विन् ततः स्वार्थे "विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ । इति खः ।) पराङ्मुखः । इत्यमरः । ३।१।३३ ॥ (यथा, भागवते ।३।३२।२८ ।
"ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्म्मिणा ॥")

पराजयः, पुं, (परा+जि+अप् ।) रणे भङ्गः । इत्यमरः । २ । ८ । १११ ॥ (अत्र रण इत्युपलक्षणं वस्तुतस्तु विद्यावादादावपीतिबोद्धव्यम् ।) तत्पर्य्यायः । भङ्गः २ हारी ३ हारिः ४ पराभवः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ७ । १९९ ।
"अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥")

पराजितः, त्रि, (परा+जि+कर्म्मणि क्तः ।) कृतपराजयः । हारितः । तत्पर्य्यायः । पराभूतः २ विजितः ३ निर्जितः ४ जितः ५ । इति शब्दरत्नावली ॥ "इदं वाच्यमिदमवाच्यमेवं सति पराजितो भवतीति इमानि खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

पराञ्जः, पुं, (परान् अनक्तीति । अञ्ज व्याप्तौ+अच् ।) तैलयन्त्रः । फेनः । छुरिकादलम् । इति शब्दरत्नावली ॥

परात्परः, पुं, परात् श्रेष्ठादपि परः श्रेष्ठः । स च श्रीकृष्णः । यथा,—
"देवाः कालस्य कालोऽहं विधातुर्विधिरेव च ।
संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

परात्प्रियः पुं, (परादपि प्रियः ।) तृणविशेषः । इति शब्दचन्द्रिका । उलुं इति भाषा ॥

परादनः, पुं, (परमुत्कृष्टं अदनं यस्य यद्वा परान् शत्रून् अत्ति भक्षयति नाशयतीत्यर्थः आदयति विजापयति स्वारोहिणं संग्रामे इति वा अद लुगः णिच् ल्युर्वा ।) पारसीघोटकः । इति त्रिकाण्डशेषः ॥

पराधीनः, त्रि, (परस्य परेषां वा अधीनः ।) परवशः । तत्पर्य्यायः । परतन्त्रः २ परवान् ३ नाथवान् । इत्यमरः । ३ । १ । १६ ॥ तस्य जीवन्मृतत्वं यथा,—
"स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते मृताः ॥"
इति गरुड़पुराणे ११३ अध्यायः ॥

परानसा, स्त्री, चिकित्सा । इति शब्दचन्द्रिका ॥

परान्नं, क्ली, (परस्य अन्नम् ।) अन्यस्वामिकभक्तपिष्टकादि ॥ परकर्त्तृकशस्यपाकजद्रव्यमात्रम् । परस्पृष्टान्नम् । तस्य त्याज्यत्वं यथा,—